# विक्रमोर्वशीये जीवनमूल्यानि

**डॉ. देवेन्द्र कुमार शर्मा**

जीवनमूल्यानि मानवजीवने सामाजिक प्रतिष्ठाया आधारभूतानि तत्वानि। अद्यत्वे यत्र तत्र सर्वत्रमूल्यानां ह्रासस्य चर्चा प्रचलति। प्रस्तुतलेखे कालिदासस्य विक्रमोर्वशीये जीवनमूल्यानां विवेचनं क्रियते। परमोदात्तप्राचीनवाङ्मयं पृष्ठभूतौ संस्थाप्य विरचितासु कालिदासकृतिषु नास्ति कोऽपि आदर्शः, नास्ति किमपि यथार्थ, नाऽस्ति काऽपि भावना, नास्ति काऽपि कल्पना यामधिकृत्य मर्मज्ञकविना ास्वतूलिका न चलिता। अत एव देशकालयोः सीम्नः अतीव्य तेन जनमानसमान्दोलितम्।

विक्रमोर्वशीयमिति नाम्नि त्रोटकेऽस्मिन् प्रारम्भ एव जीवनस्य मूलतत्वस्य चित्रणेन परितृप्तिरनुभूयते। मूल्यानि वस्तुतः सद्गुणानां मूलभूततत्वानि। अत एव तेषां सोमानात्मकता विद्यते। अस्याः सोपानात्मकतायाः सर्वोच्चशिखरे परमात्म भूतं परमं मूल्यं विराजते। एवदेव चित्रयन् कविः कथमति–

**वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी।**
**अस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।।**
**अन्तर्यश्च मुमुक्षुभिर्नियमित प्राणादिभिर्मृग्यते।**
**स स्थाणु स्थिरभक्तियोगसुलभो निःश्रेयसायास्तुवः।।**

जीवनस्य विकासप्रक्रियायां मनुष्यः एकं स्तरविशेषं प्राप्य अमूर्ततत्वं प्रति अग्रसरति। अस्या गवेषणायाः क्रमे एव मनिवन तस्मिन् तत्वे चरमोत्कर्षोऽधिगम्यते।

कालीदासकाव्येषु प्रायोऽन्तर्निहिता व्यञ्जना वर्तते। प्रथमाङ्के सूत्रधारमाध्यमेन कविर्वदति– ''तदुच्यतां पात्रवर्गः स्वेषु पाठेष्ववहितैर्भवितव्यमिति।'' अत्राभिव्यञ्जितं यत् संसारोऽयमेकः रङ्गमञ्चः। तत्र सर्वैः स्वविहितं कर्त्तव्यं निष्ठया पालयितव्यम्। कालिदासेन कदापि कुत्रापि कर्त्तव्ये प्रमादः नानुमतः। उर्वश्याः प्रमादस्खलितं वचनं क्षन्तव्यं नासीत्। कस्मिंस्ते भावाभिनेवश इति पृष्टे 'पुरुषोत्तमे' इति भणितव्ये पुरूरवसीति तस्या वाणी निर्मता। अस्यापराधस्य कारणात् सा शापिता।

कालिदासस्य मते अनुशासनमेकं महत्वपूर्णं जीवनमूल्यम् उर्वश्या कार्त्तिकेयस्य नियमे उल्लङ्घिते तस्या लतारूपे परिवर्तनम् आयुषश्च अहिंसापराङ्मुखे जाते आश्रम नियमविरुद्धे आचरिते तस्य आश्रमात् निष्कासनञ्चैतदेव प्रमाणयतः। कालिदासस्य विविधाः प्रसङ्गोपात्तोद्गाराः पात्राणां व्यवहाराश्व तस्य मूल्यविषयकं

चिन्तनं प्रकाशयन्ति। अप्सरसां करुणक्रन्दनमाकर्ण्य तासामविलम्बेन परित्राणं पुरुरवसः क्षात्रधर्मानुरूपं कर्म विद्यते। अनेन कर्मणा न केवलं वर्णव्यवस्थायाम् आस्थाऽपितु परोपकारभावनाऽपि प्रकटीकृता। कृतज्ञतायां ज्ञापिताया तस्य विनयपरिपूर्णा प्रतिक्रियाऽवलोकनीया– ''तनु वज्रिण एव वीर्यमेतद्विजयन्ते द्विषतो यदस्य पक्ष्याः।''

अत्रोचितमेवोक्तं कालिदासेन–

**''अनुत्सेकः खलु विक्रमालंकारः''**

अस्मिन नाटके पुरुरवा उर्वशी न केवलं इन्द्रस्य अनुग्रहमात्रेणाधिगता अपितु तस्य कृतज्ञता, प्रत्युपकारप्रवृत्तिः विक्रमश्चात्र हेतुरूपेण विराजन्ते। वस्तुतः अस्यां कीयामेका विश्वदृष्टि व्यक्ता। मानवाः देवाश्च परस्परं प्रतिस्पर्धिनः न अपितु एकस्मिन्नेव विश्वे स्नेहेन सहयोगेन सख्यभावेन च सहवासिनः प्राणिनः। कालिदासेन नारदस्रू शब्देषु एतदेव दृष्टिकोणमभिव्यक्तम्–

**त्वत्कार्यं वासवः कुर्यात् त्वं च तस्येष्टमाचरेः।**
**सूर्यः समेधयत्यग्निमग्निः सूर्यं च तेजसा।।**

मानवः शरीरस्य मनसः आत्मनश्च समष्टिः वर्तते। तथैव प्रेम्णोऽपि त्रीणि स्वरूपाणि विद्यन्ते–

**''शारीरिकं मानसिक माध्यात्मिकञ्च।''**

शारीरिकसौन्दर्येऽऽधारितं मृगतृष्णिकावत् प्रेम पाशविकं प्रेम एव। एतद् उद्दामप्रेम परितोषं प्रदातुमक्षमम्। परन्तु अस्मात् निवर्तनं दुष्करम्। यथा विक्रमोर्वशीये विदूषकमुखेन कविनोक्तम्–

**''परिश्रान्तोऽस्म्यहं तस्या मृगतृष्णिकाया वयस्यं निवर्तयितुम्''**

कालिदासस्य काव्येु तपसः महत्ता प्रदर्शिता। कालिदासः तपसः पराकाष्ठां प्राप्य एव विश्वसाहित्ये चरमोत्कर्षं जगाम्। अस्य काव्येषु नैकेनापि नायकेन नायिकया वा प्रेमसफलता तयः अन्तरेण प्राप्ता। विक्रमोर्वशीयेऽपि विरहरूपतपसोऽनन्तरमेव फलागमः भवति।

भारतीयनारी उत्सर्गस्य व्यागस्य क्षमाया ममतायाश्च मूर्त्तिः। एतेषां गुणानां विकासानुरूमेव तस्या महत्त्वमाकर्षणोञ्च वृद्धिमायातः 'प्रियानुप्रसादनं' नाम व्रतविशेषमाचरन्त्या देव्याः सौन्छर्यमलौकिकं खलु सञ्जातम् सितांशुकां मङ्गलमात्रभूषणां पवित्रोदूर्वाऽङ्कुरलाञ्छितालकां व्रतायदेशोज्झितगर्वां देवीं दृष्ट्वा उर्वश्या मुखाद् अनायासं असूयायराङमुखं वाक्यं विनिः सृतम्। ''हला स्थाने खलु इयं देवीशब्देनोपचर्यते न किमपि परिहीयते शच्या ओजस्वितया। अतः यदा व्यक्तेः 'स्वः' परार्थे विलीयते तदा 'सर्वजनहिताय सर्वजन सुखाय' सम्पन्नं जीवनम् आकर्षणकेन्द्रं जायते। यदात्मनः सुखावसानेन परेषां दुःखनिवारणं क्रियते तदा विश्वासविशदं वातावरणं विरच्यते।

कालिदासस्य चिन्तनं विषयस्य गहनातिगहनं तलं स्पृशति। प्रायः मूल्यह्रासस्य कारणज्ञानं अभावो वा भवति। यथोक्तमपि ''बुभुक्षितः किं न करोति यायम्'' अतः भरतवाक्येन तेन प्रार्थितं–

**सङ्गतं श्रीसरस्वत्यो भूतयेऽस्तु सदा सताम्''**

एवं कालिदासस्य विक्रमोर्वशीये यत्र तत्र जीवनमूल्यविषयकं विवेचनं तत्त्वान्वेषणञ्च उपलभ्येते। कवेः त्रोटकमेतत् जीवनमूल्यानां मूलभूततत्वस्य ''सत्यं शिवं सुन्दरम्'' इत्यस्य सुचारुचित्रणेन सहृदयेभ्यः परितोषं प्रददाति।